**International Journal of Research in Social Sciences**

Vol. 9 Issue 2, February 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# शैक्षिकानुसन्धाने अभिवृत्तिमापिनी

**डॉ.कुलदीपसिंहः**
**सहायकाचार्यः, शिक्षाविभागे**
**ज.रा.राजस्थानसंस्कृतविश्वविद्यालयःजयपुरम्**

**सारांश:**

शिक्षाया: एकम् उद्देश्यं समाजस्य आकाङ्क्षानुगुणं सन्नागरिकस्य निर्माणमस्ति। एतदर्थं बालकस्य व्यवहारस्य परिमार्जनम् अत्यन्तम् अनिवार्यं कार्यमस्ति। व्यवहारस्य विविधेषु घटकेषु अभिवृत्तीनां महत्त्वपूर्णं स्थानं भवति। कमपि विचारं, कामपि व्यक्तिं किमपि वस्तु वा प्रति यत् व्यवहारं करोति, तत् तस्य अभिवृत्तिषु आधारितं भवति।

**उद्देश्यानि**

1. अभिवृत्तिः, रुचिः, अभिरुचि: च इत्येतासां सङ्कल्पनाया: विभेदज्ञापनम्।
2. शिक्षाशास्त्रे अनुसन्धानरतानां गवेषकाणां कृते विविधशोधोकरणेषु विशेषतया अभिवृत्तिमापिन्या: सम्प्रत्ययस्य उपयोगस्य च परिज्ञापनम्।
3. विविधानाम् अभिवृत्तिमापिनीनां परिचयपुरस्सरं प्रयोगप्रक्रियाप्रदर्शनम्।
4. अभिवृत्तिमापिन्या: निर्माणार्थम् अपेक्षितानां बिन्दूनां निर्देशनम्।

**मुख्यशब्दा:** - अभिवृत्ति: (Attitude), अभिवृत्तिमापिनी (Attitude Scale), मतावलीमापिनी (Opinionnaire), मनोवैज्ञानिकं परीक्षणम् (Psychological Tests), अभिरुचि: (Aptitude), रुचि: (Interest)।

**प्रस्तावना**

अभिवृत्ति: व्यक्तित्वस्य स: गुण: अस्ति, यद्द्वारा व्यक्ते: स्वीकार्यताम् अस्वीकार्यातां वा ज्ञापति। अभिवृत्ति: आङ्ग्लभाषया Attitude इत्युच्यते। Attitude इति शब्द: लेटिनभाषाया: Abtus इत्यस्मात् शब्दात् निष्पन्नमस्ति, यस्यार्थो भवति योग्यता सुविधा वेति। अभिवृत्ते: सम्बन्ध: अनुकूलप्रभावेण प्रतिकूलप्रभावेण वास्ति। सैषा एका मानसिकदशास्ति, या हि सामाजिकव्यवहारस्य अभिव्यक्तिं कर्तुं महत्त्वपूर्णां भूमिकां निर्वहति।

**अभिवृत्तेः अर्थः**

अभिवृत्ति: व्यक्ते: मनोभावान् (Feelings) विश्वासान् (Believe) वा प्रति सङ्केतं करोति। अत: नैके मनोवैज्ञानिका: अभिवृत्तिं बहुधा मनोवृत्ति: इत्यनेन शब्देनापि व्यवहरन्ति। अनुसन्धानस्य उपकरणेषु अभिवृत्तिमापिनी (Attitude Scale) अथवा मतावलीमापिनी (Opinionnaire) अतीव महत्त्वपूर्णम् उपकरणम् अस्ति।

एतत् एकं मनोवैज्ञानिकं परीक्षणम् (Psychological Tests) अस्ति। अस्मिन् शोधोपकरणे कस्यचित् जनस्य अभिवृत्तेः विश्वासानां वा मापनं भवति। अभिवृत्तिमापन्यां प्रश्नानां माध्यमेन कस्मिंश्चित् कथने जनानाम् अभिवृत्तीनाम् आधारे निष्कर्षः प्राप्यते। सामान्यतया अभिवृत्तेः अर्थः मतमिति मन्यते। किन्तु अभिवृत्तिः मतं चेत्यनयोः मध्ये कश्चन भेदः भवति। कामपि घटनां प्रति व्यक्तिविशेषस्य आन्तरिकभावः अथवा विश्वासः अभिवृत्तिः भवति। एतादृशस्य आन्तरिकभावस्य विश्वासस्य वा मापनं दुष्करं भवति। तस्य व्यक्तिविशेषस्य अभिवृत्तेः विश्वासस्य वा अभिव्यक्तिः मतमाध्यमेन एव भवति। यथा मनसि भावः भवति तथैव प्रस्तुतविषये अपि मतं भवति। यथा रामचरितमानसे धनुर्भङ्गप्रसङ्गे तुलसीदासमहोदयः उक्तवान् –

**जेहि की रही भावना जैसी, प्रभु मूरति देखी तिन तैसी।**
**देखहिं रूप महारनधीरा, मनहुँ वीर रस धरे शरीरा।।**
**डरे कुटिल नृप हृदय विचारी, मनहुँ भयानक मूरति भारी।।**

परन्तु समस्या एषा भवति यत् यदि जनाः आत्मनः व्यवहारे मनसः वास्तविकाभिवृत्तेः अभिव्यक्तिं मतरूपेण न कुर्वन्ति, तर्हि तेषाम् अभिवृत्तेः ज्ञानं भवितुं न अर्हति। अभिवृत्तेः मापिन्यां प्रश्नानां निर्माणे सम्बद्धविषयस्य पूर्णतः सर्वेक्षणम् आवश्यकं भवति। अस्यां मापिन्यां विषयसम्बद्धप्रश्नानां पुरतः पक्ष-विपक्षरूपेण कतिचन क्रियात्मककथनानि भवन्ति। उत्तरदाता तेषु कथनेषु स्वमतानुसारम् अनुकूल-प्रतिकूलरूपेण चिह्नाङ्कनं करोति। विकल्पानां चयनस्य आधारे अनुसन्धानकर्ता प्रयोज्यस्य मतस्य दिशां तीव्रतां च ज्ञातुं शक्नोति। मापिन्या: आरम्भे प्रयोज्यस्य नाम, आयुः, स्तरः चेत्यादीनां विवरणं भवति।

**अभिवृत्तेः परिभाषाः**

'अभिवृत्ति'-शब्दं निरूपयितुम् अनेके मनोवैज्ञानिका: स्वस्वबुद्ध्या परिभाषां दत्तवन्त:, तद्यथा -

1. **आलपोर्ट** – अभिवृत्ति: प्रत्युत्तरदानस्य सा मानसिकतया स्नायुविकतत्परताभिश्च सम्बन्धिता अवस्थास्ति, या हि अनुभवै: सङ्घटिता भवति। अभिवृत्तिभि: व्यवहारे निर्देशात्मक: गत्यात्मकश्च प्रभाव: पतति।
2. **वुडवर्थ** – अभिवृत्तय: मतानां, रुचीनाम् उद्देश्यानां वा स्थिरप्रवृत्तय: भवन्ति, यासु कस्याश्चित् पूर्वज्ञानप्रत्याशाया: तत्परता निहिता भवति।
3. **आईजनेक** – सामान्यत: अभिवृत्ते: परिभाषा कस्यापि वस्तुन: समूहस्य वा सम्बन्धे प्रत्यक्षात्मकासु बाह्योत्तेजनासु व्यक्ते: स्थिते: प्रत्युत्तरस्य वा तत्परतारूपेण दातुं शक्यते।

**अभिवृत्तेः रुचेश्च सम्बन्धः**

अभिवृत्ति: (Attitude) रुचि: (Interest) च व्यक्तित्वस्य महत्त्वपूर्णम् अङ्गभूते स्त:। अनयो: प्रकृतौ व्यवहारे पर्याप्तम् अन्तरं वेविद्यते। रुचे: सम्बन्ध: अस्माकं लिप्सया सह भवति। रुचौ व्यक्ते: प्रतिक्रिया तत्रैव सीमिता भवति, यत्र तस्य रुचि: भवति। रुचे: तुलनायाम् अभिवृत्ते: क्षेत्रं व्यापकं भवति।

**अभिवृत्तेः अभिरुचेश्च सम्बन्धः**

अभिवृत्ति: (Attitude) सदैव अर्जिता भवति, किन्तु अभिरुचि: (Aptitude) अर्जिता जन्मजाता चेति उभयथापि भवितुमर्हति। केषुचित् व्यवसायेषु कासुचित् क्रियासु चैव अभिरुचे: क्षेत्रं सीमितं भवति, किन्तु अभिवृत्ते: क्षेत्रं विस्तृतं भवति।

**अभिवृत्तीनां प्रकृतिः**

मुख्यतया अभिवृत्ते: प्रकृति: त्रिधा भवति, तद्यथा -

1. **धनात्मकाभिवृत्तिः** – कस्याश्चित् व्यक्ते: घटनाया: वा कृते सकारात्मकदृष्टि: धनात्मकाभिवृत्ति: इत्युच्यते।
2. **ऋणात्मकाभिवृत्तिः** – कस्याश्चित् व्यक्ते: घटनाया: वा कृते नकारात्मकदृष्टि: ऋणात्मकाभिवृत्ति: इत्युच्यते।
3. **शून्याभिवृत्तिः** – कस्याश्चित् व्यक्ते: घटनाया: वा कृते यदा न तु सकारात्मकदृष्टि: भवति, नैव च नकारात्मकदृष्टि: भवति, तदा शून्याभिवृत्ति: भवति।

**अभिवृत्तेः प्रकाराः**

1. **विशिष्टाभिवृत्तिः** –या: अभिवृत्ति: कामपि व्यक्तिं, घटनां, विचारधारां संस्थां वा प्रति व्यक्तीक्रियते, सा विशिष्टाभिवृत्तिरित्युच्यते। यथा कस्मिंश्चित् छात्रे आत्मन: शिक्षकाय य: सम्मान: श्रद्धाभावो भवति, सा विशिष्टाभिवृत्ति: भवति।

2. **सामान्याभिवृत्तिः** – या अभिवृत्तिः व्यक्तेः, वस्तुनः, घटनायाः, विचारस्य चेत्यादीनां विषये सामान्यरूपेण सामूहिकरूपेण वा व्यक्तीक्रियते, सा सामान्याभिवृत्तिरित्युच्यते। यथा वस्त्राणां, राजनैतिकदलानां रेलदुर्घटनानां वा विषये अभिवृत्तिः।
3. **नकारात्मकाभिवृत्तिः** – यदि अस्माकं दृष्टिः किमपि वस्तु, कामपि घटनां किञ्चद्विवारं वा प्रति सुखदं न भवति, अथवा तत्तदस्मभ्यं न रोचते, अथवा अस्माकं प्रतिक्रिया उत्तेजनात्मकरूपेण भवति, तर्हि सा नकारात्मकाभिवृत्तिः भवति। एवमेव यदा वयं कस्यचित् कृते घृणाम्, नैराश्यम् अविश्वासं वा प्रदर्शयामः, तदा सा नकारात्मकाभिवृत्तिः भवति।
4. **सकारात्मकाभिवृत्तिः** – यदि अस्माकं दृष्टिः किमपि वस्तु, कामपि घटनां किञ्चद्विवारं वा प्रति सुखदं न भवति, अथवा तत्तदस्मभ्यं न रोचते, अथवा अस्माकम् अनुकूला प्रतिक्रिया भवति, तर्हि सा सकारात्मकाभिवृत्तिः भवति। उदाहरणार्थं कस्याञ्चित् धार्मिकप्रक्रियायां विश्वासः सकारात्मकाभिवृत्तिरित्युच्यते।
5. **मानसिकाभिवृत्तिः** – मानसिकरूपेण जीवनस्य विविधक्षेत्राणां सम्बन्धे पृथक्-पृथगभिवृत्तिः भवति। सौन्दर्यनुभूतिः, सामाजिकानुभूतिः, धार्मिकानुभूतिः च मानसिकाभिवृत्तिः भवति।

**अभिवृत्तेः विशेषताः**

1. अभिवृत्तिः भावनानां गभीरतायाः स्वरूपं भवति।
2. अभिवृत्तीनां विकासः सामाजिकसम्बन्धानां कारणतः भवति।
3. अभिवृत्तेः सामाजिकः मानसिकश्चेति उभावपि पक्षौ भवतः।
4. अभिवृत्तिः व्यक्तिगता सामाजिकी चेति उभयथा भवति।
5. अभिवृत्तिः जन्मजाता न भवति।
6. अभिवृत्तिः व्यक्तेः व्यवहारस्य प्रतिबिम्बनं भवति।
7. अभिवृत्तिः सदैव परिवर्तनशीला भवति।
8. अभिवृत्तिः सदैव संवेगैः भावैश्च प्रभाविता भवति।
9. अभिवृत्तेः सम्बन्धः समस्याभिः आवश्यकताभिश्च भवति।
10. अभिवृत्तेः कारणतः व्यवहारः प्रभावितो भवति, अतः एकस्याः व्यक्तेः अभिवृत्तीनां प्रभावः द्वितीयायाः व्यक्तेः अभिवृत्तिष्वपि पतति।

**अभिवृत्तेः ऐतिहासिकपृष्ठभूमिः**

अभिवृत्तिमापनस्य ऐतिहासिकी पृष्ठभूमिः अनतिप्राचीनास्ति। अभिवृत्तिमापनस्य प्रविधीनां निर्माणकार्यं 1927 इति ईस्वीयवर्षे थर्स्टनमहोदयस्य युग्मतुलनात्मकप्रविधिभिः प्रारब्धम्। एतस्मात्पश्चात् मोस्टेलर (1951) महोदयः एतेषां विधीनां परीक्षणस्य सार्थकतां ज्ञातुं काई-वर्गस्य प्रतिपादनं कृतवान्। लिकर्ट (1932) महोदयः योगनिर्धारणविधेः प्रतिपादनमकरोत्। एतस्मात्परं सफीर (1937) महोदयः क्रमबद्धान्तरविधेः प्रस्तावं कृतवान्। गट्मैन (1945) महोदयः अभिवृत्तिमापनस्य स्केलोग्रामविधेः प्रतिपादनं कृतवान्। तत्पश्चात् एडवर्स किलपैट्रिक (1948) महोदयौ भेदबोधकमापिनीविधेः निरूपणं कृतवन्तौ। इत्थं शिक्षकैः, औद्योगिकप्रबन्धकैः, शिक्षाशास्त्रिभिः, मनोवैज्ञानिकैश्च समये समये विविधानाम् अभिवृत्तिमापिनीनां रचना कृता।

**अभिवृत्तेः मापनम्**

प्रायशः सप्ततिवर्षपूर्वमेव अभिवृत्तिमापनस्य प्रविधीनां विकास समारब्धः। एतस्मात्पूर्वं केवलं साक्षात्कारेण अवलोकनेन चैव अभिवृत्तीनां मापनं क्रियते स्म। 1927 इति ईस्वीयवर्षे थर्स्टन महोदयः तुलनात्मकनियमस्य प्रतिपादनमकरोत् । अभिवृत्तिमापनस्य विधयः

**International Journal of Research in Social Sciences**
Vol. 9 Issue 2, February 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

मुख्यतया भागद्वये वर्गीकृता: सन्ति-

**1.** व्यावहारिकप्रविधय:

**2.** मनोवैज्ञानिकप्रविधय:

**1. व्यावहारिकप्रविधय:**

व्यावहारिकविधिषु साक्षाद्रूपेण प्रयोज्यस्य पुरत: प्रश्नाविष्करणं कृत्वा तस्य व्यवहारस्य प्रत्यक्षम् अवलोकनं कृत्वा तस्य अभिवृत्तीनां परीक्षणं क्रियते।

**(क) प्रत्यक्षप्रश्नविधि:** – प्रत्यक्षप्रश्नविधौ कामपि घटनां प्रति अभिवृत्ते: ज्ञातुं साक्षात् प्रश्ना: पृच्छयन्ते। तस्य उत्तराणाम् आधारे अभिवृत्तीनां विषये परिचय: प्राप्यते। अस्मिन् विधौ अनुकूलाभिवृत्ति:, प्रतिकूलाभिवृत्ति: शून्याभिवृत्तिश्चेति त्रिधा अभिवृत्तिमापनं क्रियते।

**(ख) व्यवहारस्य प्रत्यक्षनिरीक्षणविधि:** – अस्मिन् विधौ व्यक्ते: व्यवहारस्य प्रत्यक्षतया निरीक्षणं कृत्वा तस्य अभिवृत्ति: ज्ञायते। एष विधि: प्रत्यक्षप्रश्नविधे: तुलनायां सूपयुक्तोऽस्ति। यतो हि अस्मिन् प्रयोज्य: न जानाति, यत् कश्चित् प्रयोगकर्ता तस्य व्यवहारस्य निरीक्षणं कुर्वन्नस्तीति। फलत: अत्र वास्तविकव्यवहारस्याधारे अभिवृत्तिमापनं भवति।

**2. मनोवैज्ञानिकप्रविधय:**

यदा प्रचलितविधिषु कश्चन लोपो भवति, तदा नवीनानां विधीनां प्रादुर्भावो भवति। अनेन प्रकारेण अभिवृत्तिमापनस्य व्यावहारिकप्रविधिषु मूल्याङ्कनकर्तु: व्यक्तिनिष्ठाया: दोषसम्भावनावशात् मनोवैज्ञानिकविधीनाम् आविष्करणमभवत्। अभिवृत्तिमापनस्य क्षेत्रे अधोलिखितानां मनोवैज्ञानिकविधीनां प्रयोगो विधीयते-

(क) **थर्स्टनविधि**: - अस्मिन् विधौ समूहं, समाजं, विचारं परम्परां वा प्रति कस्यचित् जनस्य प्रतिक्रियां ज्ञातुं 25-25 वाक्यानाम् एकत्र सङ्ग्रहणं क्रियते। तेषु वाक्येषु यत्र विशेषज्ञानाम् अधिकः मतभेदः भवति, तानि वाक्यानि प्रश्नावल्यां न स्वीक्रियन्ते। प्रयोज्यः अभिवृत्तिमापन्यां येषु कथनेषु सहमतः भवति, तेषु कथनेषु चिह्नाङ्कनं करोति।

(ख) **थर्स्टन चेव इतयनयो: समदृष्टेरन्तरविधि:** – अस्य विधे: प्रतिपादकौ थर्स्टन चेव इत्येतौ महोदयौ वर्तेते। अस्मिन् विधौ कतिचन कथनानि भवन्ति, किन्तु तेषां संख्या अधिका भवति। कथनानि युग्मेषु न भूत्वा स्वतन्त्ररूपेण भवन्ति। प्रत्येकं प्रश्ने व्यक्ते: प्रतिकूलता, अनुकूलता तटस्थता वा जिज्ञास्यते। एतदर्थं 11 बिन्दूनां निर्धारणमापिनी निर्मीयते।

(ग) **लिकर्टस् विधि**: - अस्मिन् विधौ विशेषज्ञानां सहायतायाः आवश्यकता न भवति। किन्तु अभिवृत्तिमापिन्या: परिणामः थर्स्टनविधिवत् एव शुद्धः भवति। अस्मिन् विधौ शोधविषयेण सह सम्बद्धकथनानां सङ्ग्रहणं क्रियते। तत्र प्रत्येकस्य प्रश्नस्य पुरतः पूर्णतः सहमतः, सहमतः, अनिश्चितः, असहमतः, पूर्णतः असहमतः इति प्रकारेण पञ्च विकल्पाः भवन्ति। तत्र पूर्णतः सहमतस्य कृते 4, सहमतस्य कृते 3, अनिश्चितस्य कृते 2, असहमतस्य कृते 1 तथा पूर्णतः असहमतस्य कृते 0 इति प्रकारेण अङ्कदानं भवति। आन्तरिकरूपेण विश्वसनीयतार्थं लघुन्यादर्शे मापिन्या: प्रशासनं कृत्वा सन्देहपूर्णवाक्यानां त्यागः करणीयः। उदाहरणार्थं यदि अभिवृत्तिमापिन्यां 50 कथनानि सन्ति, तर्हि प्राप्ताङ्कानां विवरणमधोलिखितरूपेण भवितुमर्हति –

| | | |
|---|---|---|
| **पूर्णतः सहमतः** | - | 50 x 4 = 200 |
| **सहमतः** | - | 50 x 3 = 150 |
| **अनिश्चितः** | - | 50 x 2 = 100 |
| **असहमतः** | - | 50 x 1 = 50 |
| **पूर्णतः असहमतः** | - | 50 x 0 = 00 |

**International Journal of Research in Social Sciences**
Vol. 9 Issue 2, February 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

एवं प्रकारेण प्राप्ताङ्काः 200 तः शून्यपर्यन्तं भवितुमर्हति। 100 तः अधिकप्राप्ताङ्काः सकारात्मकाभिवृत्तिं सूचयन्ति। 100 तः न्यूनप्राप्ताङ्काः नकारात्मकाभिवृत्तिं सूचयन्ति।

(घ) **सफीर क्रमबद्धान्तरविधि:** – सर्वप्रथमत: थर्स्टन महोदय: अस्मिन् विधौ कार्यं कृतवान्। किन्तु कालान्तरे सफीर महोदय: अस्य विधे: विकासं प्रचारं च कृतवान्। अत: एष विधि: सफीर क्रमबद्धान्तरविधि: इति नाम्ना ज्ञायते। अस्मिन् विधावपि कथनानां भूयसि संख्या भवति। अत्र कथनानां क्रमान्तरं माप्यते। प्रत्येकं कथनस्य आवृत्तिविवरणम् एतत् बोधयति यत् कथनानाम् आवृत्ति: कियदभवदिति।

(ङ) **गटमैनस्कैलांग्रामविधि:** – गटमैन महोदय: सर्वथा नवीनविधे: प्रस्तावं कृतवान्। अस्मिन् विधावपि कथनानि परस्परं सम्बद्धानि भवन्ति। सहमते: मात्रा यावती अधिका भविष्यति, अभिवृत्ते: अङ्का: तावन्त: अधिका: एव भविष्यन्ति। अस्मिन् विधौ कथनस्य विषये केवलं व्यक्ते: सहमति: असहमति: वा पृच्छयते। सहमते: स्थितौ 1 परिमिताङ्कम् असहमते: स्थितौ 0 परिमिताङ्कं प्रदाय सर्वेषां योगं कृत्वा अभिवृत्ते: निर्धारणं क्रियते।

(च) **भेदबोधकमापिनीविधि:** – एडवर्डस किलपैट्रिक च 1948 ईस्वीयवर्षे अस्य विधे: प्रतिपादनं कृतवन्तौ। एष विधि: भौतिकविधि: नास्ति, अपितु अस्मिन् उपलब्धान् समानविधीन् एकीकृत्य अभिनवनया प्रस्तूयते।

(छ) **सिमेन्टिक डिफरेंशियल विधि:** – 1952 ईस्वीयवर्षे ओसगुड महोदय: सर्वप्रथमतया अस्य विधे: प्रयोगं कृतवान्। एष विधि: विश्वसिति यत् एकमेव मनोवैज्ञानिकपदार्थं प्रति विभिन्नानां व्यक्तीनां विभिन्ना: धारणा: भवन्ति। धारणासु सैषा विभिन्नता व्यक्तिगतविभिन्नतानां कारणत: भवति। अस्या: मान्यताया: आधारे एव ओसगुड महोदय: अस्य विधे: प्रवर्तनं कृतवान्।

(ज) **मास्टर टाइप मापिनी** – अभिवृत्तिमापिनीनां विश्वसनीयता वैधता (Reliability and Validity of Attitude Scales) च अधिकांशतया समरूपान्तरविधिना समविषयप्राप्ताङ्कविधिना ज्ञायते। एतदाधारे रैमर्स महोदय: अनुकूलताया: व्यवकलनक्रमे अभिवृत्तिमापनस्य कृते मास्टर टाइप मापिन्या: रचनामकरोत्।

**अभिवृत्तिमापिन्या: निर्माणार्थं निर्देशा:**

1. अभिवृत्तिमापिन्या: निर्माणार्थं सम्बद्धसाहित्यस्य अध्ययनं करणीयम्।
2. विशेषज्ञजनानां परामर्श: स्वीकरणीयः।
3. कथनानाम् एकः एव अर्थः स्यात्।
4. अभिवृत्तिमापिन्यां विवादपूर्णकथनानां भ्रमपूर्णकथनानां च कृते स्थानं न स्यात्।

**अभिवृत्तिमापिन्या: गुणा**:

1. अभिवृत्तिमापिन्या: आधारे मतानां सङ्ग्रहणं वर्गीकृतरूपेण भवितुम् अर्हति।
2. मतानां सांख्यिकीयं विश्लेषणं सम्भवति।
3. उत्तरदानाय अधिकचिन्तनस्य आवश्यकता न भवति।

**अभिवृत्तिमापिन्या: दोषा**:

1. स्वतन्त्ररूपेण अभिव्यक्तिं कर्तुम् अवसरः न्यूनः भवति।
2. जनाः बहुधा यथार्थरूपेण स्वमतं न सूचयन्ति।

3. विकल्पेषु एकस्य विकल्पस्य चयने सन्देहः भवति।

**निष्कर्षः**

सारांशरूपेण वक्तुं शक्यते यत् विश्वासानां मापनं कर्तुम् अभिवृत्तिमापिनी एकम् उत्कृष्टं साधनं अस्ति। अस्य उपकरणस्य माध्यमेन शोधकर्ता प्रयोज्यस्य मतस्य दिशां प्रगाढतां च ज्ञातुं शक्नोति। यदि प्रयोज्यः ज्ञात्वा वास्तविकम् अभिमतं न सूचयति, तर्हि अभिवृत्तिमापिन्या: औचित्यं क्षीणं भवति। अतः अभिवृत्तिमापिन्या: प्रशासनात् पूर्वं प्रयोज्यस्य सम्यक् मार्गदर्शनं करणीयम्।

**सन्दर्भग्रन्थाः**

1. Boring, E.C., Langfield, H.S. and Weld, H.P. (Eds.), Foundation of Psychology, 2nd ed., John Wiley, New York, 1961.
2. Edward, A.L., Techniques of Attitude Scale Construction, Appleton-Century-Crofts, New York, 1957. Guilford, J.P., Psychological Methods, McGraw-Hill. New York, 1954.
3. Kuppuswamy, B., An Introduction to Social Psychology, Asia Publishing House, Bombay, 1971.
4. Likert, Rensis, "A Technique for the Measurement of Attitudes", Archives of Psychology, 140, 1-55, 1932. McDougall, William, Introduction to Social Psychology, Methuen, London, 1946.
5. McKeachie, W.J. and Doyle, C.L., Psychology, Addison-Wesley, New York, 1966.
6. Sorenson, Herbert, Psychology in Education, 7th ed., Tata McGraw-Hill, New Delhi, 1977.
7. Thurstone, L.L., "Attitudes can be measured", American Journal of Psychology, 33, 529-554, 1928. Travers, Robert M.W., Educational Psychology, Macmillan, New York, 1973.
8. Wittakar, J.0., Introduction to Psychology (International Students Edition). W.B. Saunders. New York. 1970.